# १०

अस्मिन् विद्यालये चतस्रः कक्ष्याः सन्ति। एते सप्त छात्राः चतुर्थकक्ष्यायां पठन्ति। चित्रं पश्य। एको बालकः तिष्ठति। अन्ये उपविष्टाः। तिष्ठन् बालकः उपाध्यायस्य प्रश्नानाम् उत्तराणि कथयति।

त्वं कस्यां कक्ष्यायां पठसि? अहं तृतीयकक्ष्यायां पठामि।

कति छात्राः त्वया सह पठन्ति? मया सह चत्वारो बाकलाः तिस्रो बालिकाश्च पठन्ति। आहत्य वयम् अष्टौ सहपाठिनः स्मः। द्वितीयकक्ष्यायां द्वे बालिके त्रयो बालकाश्च पठन्ति। प्रथमकक्ष्यायां पञ्च बालकाः पञ्च बालिकाश्च सन्ति।